जकारस्थान्तःस्थयकारश्छान्दसो द्रष्टव्य इत्युक्का वर्णादिरयं निर्णीतः । च, जचति । लु घ, जचिति । इति दुर्गादासः ॥

जक्षणं, क्ली, (जक्ष+भावे ल्युट् ।) भक्षणम् । इति हेमचन्द्रः । ३ । ८७ ॥

जक्ष्मः, पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः । जक्ष+बाहुलकात् मन् ।) जक्ष्मा । इत्यमरटीका ॥ (केचित् तु "अर्त्तिस्तुसुहुस्रिति ।" १ । १३९ । उणादिसूत्रेण यक्ष पूजायामिति धातोर्मन्प्रत्ययनिर्द्देशात् अन्तःस्थयकारादिरिति मन्यन्ते ॥)

जक्ष्मा, [न्] पुं, (जक्षिति भक्षयति शरीरं नाशयतीत्यर्थः । जक्ष+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १ ४४ । इति मनिन् ।) यक्ष्मरोगः । इत्यमरटीकायां भरतः ॥

जगच्चक्षुः, [स्] पुं, (जगतां भुवनानां चक्षुरिव प्रकाशकत्वात् ।) सूर्य्यः । इति हेमचन्द्रः । २ । १२ ॥ (यथा, काशीखण्डे । ४६ । ४४ ।
"इति काशीप्रभावज्ञो जगच्चक्षुस्तमोनुदः ।
कृत्वा द्वादशधात्मानं काशीपुर्य्यां व्यवस्थितः ॥")

जगत्, क्ली, (गच्छतीति । गम+"द्युतिगमिजुहोतीनां द्वे च ।" ३ । २ । १३८ । इत्यस्य वार्त्तिं इति क्विपि द्वित्वे च "गमः क्वौ ।" ६ । ४।४० । इति मलोपे तुक् ।) विश्वम् । तत्पर्य्यायः । जगती२ लोकः३ पिष्टपम्४ भुवनम्५ । इत्यमरः । २ । १ । ६ ॥ विष्टपम्६ । इति तट्टीका ॥ (यथा, मनुः । १ । ५२ ।
"यदा स देवो जागर्त्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति ॥"
गच्छति इतस्ततो वातीति ।) वायौ, पुं । (गच्छन्त्यस्मिन् जीवा इति । महादेवः । यथा, महाभारते । १३ । १७ । १५१ ।
"विमुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्द्धनो जगत् ॥")
जङ्गमे त्रि । इति मेदिनी । ते, १०८ ॥

जगत्कर्त्ता, [ऋ] पुं, (करोतीति । कृ+तृच् । ततो जगतः कर्त्ता कारकः ।) ब्रह्मा । इति हेमचन्द्रः । २ । १२६ ॥

जगत्प्राणः, पुं, (जगतां विश्वस्थजीवानां प्राणो जीवनम् ।) वायुः । इत्यमरः । १ । १ । ३५ ॥

जगत्साक्षी, [न्] पुं, (जगतां भुवनानां साक्षी कर्म्मद्रष्टा ।) सूर्य्यः । इति हेमचन्द्रः ।२।१२ ॥

जगती, स्त्री, (गच्छति कार्य्यत्वात् नष्टा भवतीति । गम+"वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणां २ । ८४ । इति अतिप्रत्ययेन निपातनात् साधुः । ततः शतृतुल्यत्वात् "उगितश्च ।" ४ । १ । ६ । इति ङीप् ।) भुवनम् । (यथा, रामायणे । २ । ६९ । ११ ।
"स्वप्नेऽपि सागरं शुष्कं चन्द्रञ्च पतितं भुवि ।
उपरुद्धाञ्च जगतीं तमसेव समावृताम् ॥")
पृथ्वी । (यथा, मार्कण्डेये । ६ । २२ ।
"तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्वा शूलेन वक्षसि ॥")
जनः । छन्दोविशेषः । इति मेदिनी । ते,१०९ ॥ (सा च द्वादशाक्षरा वृत्तिः । यथा, छन्दोमञ्जर्य्यां १ स्तवके ।
"त्रिष्टुप् च जगती चैव तथातिजगती मता ॥"
अस्या उदाहरणादीनि छन्दःशब्दे द्रष्टव्यानि ॥) जम्बूवप्रम् । इति हेमचन्द्रः ॥

जगदम्बा, स्त्री, (जगतामम्बा माता ।) दुर्गा । यथाह कश्चित् ।
"अदूरे जगदम्बाया शारदीयो महोत्सवः ॥"
"जगदम्बापदद्वन्द्वमापदां चयसाधनम् ॥"
इति शूलपाणिः ॥
अपि च ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३१ अध्याये ।
"विष्णुमायां भगवतीं दुर्गां दुर्गतिनाशिनीम् ।
प्रकृतिं जगदम्बाञ्च पतिपुत्त्रवतीषु च ॥"

जगदम्बिका, स्त्री, (जगतां अम्बा जननी । ततः स्वार्थे कन् । टापि अत इत्वम् ।) दुर्गा । यथा,
"सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका ।
अहं सर्व्वान्तरस्था च संसारार्णवतारिणी ॥"
इति भगवतीगीतायां ५ अध्यायः ॥
(यथा च देवीभागवते । १ । ७ । ४६ ।
"कामं कुरुष्व वधमद्य ममैव मात-
र्दुःखं न मे मरणजं जगदम्बिकेऽत्र ॥")

जगदाधारः, पुं, (जगतामाधारः आश्रयः ।) वायुः । इति शब्दचन्द्रिका ॥ जगदाश्रयः । यथा,
"कालो हि जगदाधारः ।" इति स्मृतिः ।

जगदीशः, पुं, (जगतामीशो नियन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, पाद्मे उत्तरखण्डे । १११ अध्याये ।
"सर्व्वान्तर्यामी जगदीशस्त्वानूरमर्द्दनः प्रभुः ॥"
विधाता । यथा, कुमारे । २ । ९ ।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥"
स्वनामख्यातपण्डितविशेषः । स च न्यायशास्त्रटीकाहास्यार्णवादिग्रन्थप्रणेता अस्य जन्मस्थानं नवद्वीपः ॥)

जगद्गौरी, स्त्री, (जगत्सु मध्ये गौरी ।) मनसादेवी । इति शब्दरत्नावली ॥

जगद्धात्री, स्त्री, (जगतां धात्री विधात्री ।) दुर्गाविशेषः । अस्याः पूजायाः कालो विधिश्च यथा, निगमकल्पसारज्ञानसारस्वते ग्रन्थे दुर्गाकल्पे ।
श्रीशिव उवाच ।
"प्रसीद जगतां मातर्ज्जगन्निस्तारकारिणि ! ।
अतएव महेशानि ! तवाहं शरणागतः ॥
त्वया यत् कथितं पूर्व्वं तत् सर्व्वञ्च श्रुतं मया ।
जगद्धात्री महादुर्गा चतुर्व्वर्गफलप्रदा ॥
तस्याः पूजाविधिर्दिनं कालं तन्न प्रकाशितम् ।
तदेव कथयेशानि ! श्रोतुमिच्छामि साम्प्रतम् ॥
श्रीदेव्युवाच ।
कथयामि महेशान ! सावधानोऽवधारय ।
तस्याः पूजाविधिर्दिनं समयं भावमेदतः ॥
कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः ।
सा प्रशस्ता महादेव । महादुर्गाप्रपूजने ॥
प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता ।
सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता ॥
जपयज्ञादिभिर्द्देव ! इति त्रैकालिकी मता ।
अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर ! ॥
सप्तम्यादिनवम्यान्तं पूजाकालमितीरितम् ।
त्रिदिने त्रिविधा पूजा दशम्याञ्च विसर्ज्जयेत् ॥
पूजापरेऽह्नि देवेश ! तत्राप्यत्र विसर्ज्जनम् ।
बोधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता ॥
श्रीशिव उवाच ।
त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः ।
त्रिकाले त्रिविधा पूजा कथं देया जगन्मयि ! ॥
कथयस्व महेशानि ! इति मे संशयो हृदि ॥
श्रीदेव्युवाच ।
सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः ।
त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम् ॥
मुहूर्त्तव्यापिनी चापि तत्र ग्राह्या महेश्वर ! ।
एककाले त्रिधा पूजा साधको नैव कारयेत् ॥
इति ते कथितं वत्स ! किमन्यत् श्रोतुमिच्छसि ।
कथयिष्यामि तद्भक्त्या तव प्रीत्या त्रिलोचन ! ॥"
श्रीपार्व्वत्युवाच ।
"दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर ! ।
कथं त्रिकालं पूजा सा सम्भवेत् परमेश्वर ! ॥
श्रीशिव उवाच ।
नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत् ।
निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि ! ॥
नवमीदिनमाश्रित्य पूजाविधिरिहोदितः ।
दशम्यां बलिदानन्तु निषिद्धं नात्र पार्व्वति ! ॥
ज्ञानाम्बुतसारे पूर्व्वं पूजाप्रकारं उक्ताः ।
"मुहूर्त्तव्यापिनी चापि प्रातश्चेन्नवमी तिथिः ।
तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि ! ॥
त्रिकालं पूजयेत्तत्र नैककाले कदाचन ॥"
अथ कात्यायनीतन्त्रे अष्टसप्ततिपटले ।
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उपस्यद्वौदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्त्रारोग्यबलं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि ॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ॥"
शक्तिसङ्गमतन्त्रे ।
"कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां शक्त्या जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तमः ।
पुत्त्रपौत्त्रधनैश्वर्य्यसंयुतास्य भवेत् पुरी ॥"
तन्त्रान्तरे ।
"कुजवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः ।
प्रादुर्भूता महेशानी तत्र तां परिपूजयेत् ॥"
तन्त्रान्तरे ।
"त्रिकालं पूजयेद्दुर्गां मूलेनैकाक्षरेण च ।
नानारत्नविधानेन गीतवाद्यपुरःसरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः ।
कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम् ॥"